International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(3): 226-230
© 2023 IJSR
www.anantaajournal.com
Received: 14-03-2023
Accepted: 20-04-2023

**सुप्रीति साहा**
शैलजानन्द फाल्गुनी स्मृति महाविद्यालय, वीरभूम, पश्चिम बंगाल, भारत

**Corresponding Author:**
**सुप्रीति साहा**
शैलजानन्द फाल्गुनी स्मृति महाविद्यालय, वीरभूम, पश्चिम बंगाल, भारत

# विद्धशालभञ्जिका’नाटिकायां स्त्रीचरित्रस्य विशिष्टता-एका समीक्षा

**सुप्रीति साहा**

**प्रस्तावना**

सृष्टेरादौ एकमात्रम् आत्मानम् विद्यमानम् आसीत्।सः इच्छति मत् जाया जायते-“अथ य इच्छेद् दुहिता मे पण्डिता जायते सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तश्नीयाताम्।1

अयं औपनिषदिकं वाणीं स्त्रीसम्प्रदायाः महनीयतासम्वन्धितं भारतीयमतं प्रकाशयति। भारतीयदर्शने स्त्रीसृष्ट्या सह अभिन्नम् अखण्डसत्त्वायाः प्रकाशम् एवं वैचित्रस्य प्रसंगे स्त्री अपरिहार्यम्।सामग्रिकं वैदिककालं विचारेन पुरुषशासितसमाजस्य चित्रं दृश्यते।यद्यपि नारीशिक्षाविषयप्रसंगे वैदिकाकालस्य प्राथमिकपर्वे विशेषं विधिनिषेधं नासीत्। पश्चात् अर्थात् लौकिकयुगेऽपि इमं दृश्यं वहुक्षेत्रे प्राप्नोति। लौकिकयुगस्य प्रेक्षापटे ये कवि-नाट्यकाराः काव्यनाटकम् अरोचयन् तेषु मध्ये सचित्रम् उदाहरणं विद्यते।लौकिकसाहित्ये केन प्रकारेण स्त्रीयः प्रधानभूमिकाम् अगृह्णन् तस्य उदाहरणं “कुन्ती” “द्रौपदी” प्रभृत्या चरित्रेन प्रमाणितम्। महर्षिमनु तस्य “मनुसंहिता” ग्रन्थे स्त्रीयः प्रति विशेषसम्मानप्रदानं कृत्वा उच्यते-

“यत्र नार्यस्द पूज्यन्ते रमन्ते तत्र देवताः
यत्रैत्रास्द न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।[2]

अस्यार्थं यथा यस्मिन् समाजे स्त्रीः प्रति यथायथं श्रद्धां सम्मानं च प्रदर्शयति,अमूं समाजम् उत्तरोत्तरं समृद्धिं प्राप्यते।पुनः ये स्त्रीः प्रति न उपयुक्तं सम्मानं प्रदर्शयति ते महत् कर्मं कर्तुमपि अस्यार्थं भवति।

यथा सृष्टेः प्रधानं कारणं स्त्री, तत्कारणवशात् कश्चिदपि हृदयस्पर्शी काव्यनाटकं पठित्वा अवश्यमपि समर्थ्यते यत् तस्य काव्यनाटकस्य साफल्यं प्रति स्त्रीचरित्रस्यावदानम् अति स्मरणीयम्।एतद् प्रसंगे महाकविकालिदासेन विरचित "अभिज्ञानशकुन्तलम् नाटकम्, भासेन कृतं स्वप्नवासवदत्तम् नाटकम्, कविबाणभट्टेन सृष्टं कादम्वरी इति कथाकाव्यम्, कविराजशेखरेन विरचितं कर्पूरमञ्जरी इति सट्टकम् उल्लेखयोग्यम्। आचार्यभरतमुनि तस्य 'नाट्यशास्त्रम्' ग्रन्थे उपरूपकस्य भेदप्रसंगे नाटिकां स्वीकारं करोति।अस्याः नाटिकायाः विशेषं वैशिष्ट्यं यथा अत्र 'स्त्री'चरित्रं मुख्यम्। तदनुरूपं विशिष्टं नाटिकां यत् आचार्यराजशेखरेण विरचितं 'विद्धशालभञ्जिका' नाटिका। नाटिकाशव्दं स्त्रीलिंगान्तर्भूक्तम्। एवं नाटिकायाः लक्षणेऽपि स्त्रीणां विशेषतां नाट्यकारः प्रतिष्ठितं करोति। आचार्यविश्वनाथः तस्य 'साहित्यदर्पणम्' ग्रन्थस्य षष्ठपरिच्छेदे नाटिकायाः लक्षणविषये उक्तं यत्-

"नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरंकिका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः।।
स्यादन्तः पुरसम्वन्धा सङ्गीतव्यापृताथवा
नवानुरागा कन्यात्र नायिका नृपवंशजा।।
सम्प्रवर्त्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः।
देवी भवेत् पुनर्ज्येष्ठा प्रगल्भा नृपवंशजा।।
पदे पदे मानवती तद्वशः सङ्गमो द्वयोः।
वृत्तिः स्यात् कौशिकी स्वल्पविमर्शाः सन्धय पुनः।।[3]

अर्थात् अस्मिन् उपरूपके वयं पश्यामः यत् नायकोपेक्षा नायिकायाः अधिकं प्राधान्यं वर्णितं भवति। स्त्रीचरित्रस्य चित्तवृत्तिं तथा आत्मिकस्योपलब्धेरोपरि वर्णितं घटनां आधारप्राप्तं भवति।प्रधानाप्रधानाः पुरुषचरित्राः सदा स्त्रीणां अनुसरणं अकरोत्। तथा नाटिकायाः सार्थकत्वप्रतिपादने स्त्रीयः अग्रगण्यं भूमिकां गृह्णति।

'विद्धशालभञ्जिका' नाटिकामपि अस्य न व्यतिक्रमम्।स्त्रीचरित्रवहुलं प्रणयधर्मी इमां नाटिकां नाट्यकारः अति यत्नेन अरचयत्।अत्र नायकविद्याधरमल्लेन सह नायिकामृगाङ्कवल्ल्याः प्रेमकाहिनीम् एवम् उभयस्य वैवाहिकघटनावशात् नायकस्य राजचक्रवर्तीत्वप्राप्तिः नाटिकायाः प्रधानविषयः।

प्रधानाप्रधानाः चरित्राः विचार्येन दृश्यते यत् नाटिकायाः सुष्ठुसम्पादनेन हेतु अनेकानां स्त्रीणाम् अवदानम् उल्लेखयोग्यरूपेन प्रतिपन्नम् अभवत्।
अस्मिन् नाटिकायां मुख्याः स्त्रीचरित्राः यथा-
मदनवती-महाराजविद्याधरमल्लस्य पट्टमहिषी।
मृगाङ्कावली-लाटदेशाधिपति चन्द्रवर्मा इति सामन्तराजस्य पुत्री।
कुवलयमाला-(द्वितीय नायिका)कुन्तलाधिपति चण्डमहासेनस्य पुत्री।
पिङ्गलिका-चारायण विदूषकस्य पत्नी, ब्राह्मणी।

**सेविकाः**-विचक्षणा, सुलक्षणा, तरङ्गिका, कुरङ्गिका, हारयष्टि, कलकण्ठी, वसन्तलता, मङ्गलिका, कामकेलि, मृगांकलेखा, वकुलावली, परभृतिका, तथा कल्पलता।
मेखला-महारानीमदनवत्याःधात्रीपुत्री तथा विश्वासभाजिका परिचारिका।
स्त्रीचरित्रवहुलं नाटिकायाः मङ्गलाचरणेऽपि देव्याः स्तुतिं दृश्यते।येन नाटिकाम् अधिकं समृद्धं भवति।श्लोकं यथा-

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरुपाक्षस्य जयिनीस्ता स्तुवे वामलोचनाः।।[4]

नाटिकायाः अधिकं स्थाने या स्त्रीचरित्रं स्वां चित्तं वितनोति,सा ज्येष्ठा नायिका महाराजस्य प्रधानामहिषी मदनवती।नायिकायाः लक्षणानुसारेण ज्येष्ठानायिकाः अवस्थानं सदा ज्योतिस्वरूपं तथा महत्त्वपूर्णम्।कारणं यत् नायकं प्रति कोपं प्रसादं च तथा कृतं तद्धेतु नवनायिकया सह नायकस्य

प्रणयवशात् अपि मिलनम् असम्भवम्। तद्धेतु नायिकाया: पश्चात् महत्त्वपूर्णं स्थानाधिकारिनी भवति यत् सा। एवं महाराजः नवनायिकां प्रति प्रेमानुभवं कृत्वाऽपि प्रधानामहिषीं प्रति अधिकं स्नेहमपि सदा प्रकायति। अर्थात् एकम् अन्त:पुरनिवासिनीं स्त्रीं भूत्वाऽपि कथं स्वाधिकारं सुप्रतिष्ठितं कूर्याद् तत् विषये सा सदा उत्साहिता भवति।न केवलमेतद् विविधनवचिन्ताशैलिना नाटिकायां रससिक्तं कृतवती। साधारणतः कथितं यत् असूयाशूण्यां स्त्री समाजे सुदूर्लभम्। परन्तु अस्मिन् नाटिकायां अस्य वैपरित्यचित्रं दृश्यते।कारणं यत् यदा महाराजः मदनवत्याः भगिनीं प्रति प्रेमोन्मत्तताम् अनुभवति एतद् सा ज्ञातवती एवं पूर्वेऽपि कुन्तलिधितेः कन्यां प्रति प्रेमं अनुभवति तदा सा मदनवती कर्तव्यपरायणा भूत्वा द्वाभ्यां स्त्रिया सह विवाहसम्पन्नं कृतवती।अत्र यत् स्त्रीणां महानुभवताम् उदारतां च प्रकाशयति। यद्यपि अस्य पश्चात् एकं राजनैतिककारणं विद्यमानम्।सा ज्ञातवती यत् प्रधाना नायिका तथा तस्या मातुलकन्यया सह विवाहादनन्तरं महाराजः राजचक्रवर्तीत्वं प्राप्तं भविष्यति। अतः एकाम् अन्तपुरनिवासिनीं स्त्रीं भूत्वाऽपि समग्रराजनैतिकविषये तस्य ज्ञानम् एवं तत् सफलकरणाय विविधं प्रयासं सुप्रशंसनीयम्।नाट्यकारः राजशेखरः प्रतिक्षेत्रे तस्य अस्यां नाटिकायाम् एकं विशिष्टं स्थानं प्रतिष्ठितवती। यत् नारीचरित्रस्य शोभावर्धनं करोति।महारानीमदनवत्या स्वचरित्रस्य तथा असूयाहीननारीचरित्रस्य एकं विशिष्टं उक्तिं यथा-

"हला वयं कार्यवाह्या:,एतयोः पुनः सानुबन्धयो रसप्रपञ्चः।[5]

नाटिकायाम् अपराम् एकां स्त्रीचरित्रं यथा मृगाङ्कावली।अयं मन्यते यत् कवि राजशेखरः ईश्वरेन आशीर्वादं लब्ध्वा अतिसूक्ष्मसौन्दर्यविधायकरूपेन तस्या चरित्रं चित्रितमिति। अयं सौन्दर्यं न केवलं वहिर्जगतस्य।एतद् अन्तरस्य सुन्दरतामपि प्रकाशयति। अस्यां नाटिकायां नाट्यकारः ताम् एकां शान्ता-स्निग्धा-प्रेमातुरा च चरित्ररूपेण उपस्थापयति।यस्या चरित्रेन सह महाकविकालिदासेन विरचितम् 'अभिज्ञानशकुन्तलम्' इति नाटकस्य नायिका शकुन्तलया सह तुलनां समर्थनीयम्।द्वे नारीजगति सौन्दर्यस्य आदर्शस्वरूपम्।अमुं सौंदर्यं कवि-नाट्यकाराः तेषां रचनायां वारम्बारं प्रस्फुटितं कर्तुमिच्छन्ति।आलोच्यं नाटिकायां नायिकाया: सौन्दर्यविधायकमेकम् उल्लेखयोग्यं श्लोकं यथा-

"तद्वक्त्रं यदि मुद्रिता शशिकथा हां हेम सा चेदयुति:
तच्चक्षुर्यदि हारितं कुवलयैस्तञ्चेत् स्मितं सुधा।
धिक्कन्दर्पधनुर्भ्रुवौ च यदि ते किं वा बहु ब्रूमहे
यत्सत्यं तुनरूक्तवस्तुविरसः सर्गक्रमो वेधस:॥"[6]

नाटिकायां तस्या अनन्तं स्थिरमस्तिष्कस्य परिचयं प्राप्नोति।एका स्त्री यदा वहुकालाद् पुरुषचरित्रवेशेन छद्मवेशेन सर्वसम्मुखे अभिनयं करोति, तस्मिन् तस्या: सूक्ष्माभिनयदक्षताम् एवं स्थितधेः परिचयं प्रकाशयति। तस्या: स्थिरचित्तस्य अपरमेकं प्रमाणं प्रणयप्रसंगे वयं पश्याम:।यत्र प्रथमदर्शनेन नायकं तथा महाराजविद्याधरमल्लं प्रति हृदयस्य प्रेमोन्मत्तताम् अनुभूतमपि लज्जाशीला नारीस्वरूपा सा हृदये इमं वृत्तान्तं लुक्कायितवती।तस्या: इमं चारित्रिकवैशिष्ट्यं नाटिकाया: गहनतां प्रकाशयति।
काव्ये तथा नाटिकायां कवि-नाट्यकाराः स्त्रीचरित्रं स्नेहमयी-प्रेमस्वरूपा तथा छन्दमयीरूपेण सृष्टिं करोति।नारीचरित्रवर्जितं काव्यं नाटकञ्च दर्शकचित्ते अधिकं प्रभावविस्तारं कर्तुं न शक्नोति।परन्तु स्त्रीचरित्रसृष्टेः वैचित्र्यतां काव्य-नाटकस्य सफलतायाः पश्चात् महत्त्वपूर्णम् अवदानं स्थापयति।एतदप्रसङ्गे विद्धशालभञ्जिकानाटिकायां नाट्यकारः राजशेखरः न केवलमपि नायाकाया: चरित्रम् आलोकमण्डितं करोति अपितु अपरचरित्रान् अपि सहृदयपाठकानां हृदये सुप्रतिष्ठितं कर्तुं सिद्धहस्तमासीत्।यथा नाटिकायां अनेकसेविकानां परिचयं प्राप्नोति ताः सर्वाः

चातुर्यतापूर्णाः अभवन्।प्रथमङ्कात् अन्तिमाङ्कपर्यन्तं नाटिकां सुष्ठुसम्पादनाय तासां भूमिकामपि उल्लेखयोग्यम्। अस्मिन् नाटिकायां कश्चिद् पुरुषचरित्रव्यतिरिक्तं स्त्रीचरित्राः सदा तासां कर्तव्ये निमग्नां अभवन्।नाट्यकार: तस्य काव्यिकपटुत्वेन निष्प्रभचरित्रान् प्राणान् ददाति।नाटिकायां कश्चिद् दासी सदा प्रधानामहिषीमदनवतीं मृगाङ्कावलीं च प्रति छायाप्रदानं अकूर्वन्। सदा, स्त्री भूत्वाऽपि स्त्रीं प्रति चित्तोविनोदने आत्मनियोजनं करोति।अनन्तरं पूर्णनाटिकापाठकाले सहसा वोधितं यत् राजनैतिककार्येऽपि ता:(परिचारिका:) षड्गुणस्य परिचयं ददाति। एतदप्रसङ्गे सखि सुलक्षणा विचक्षणां परिहासेन सत्यवचनं कथ्यते यत्-'को युष्मत्तोऽन्यः षाड्गुण्यनिपुणः।'[7]

नाट्यकारः राजशेखरः अस्यां नाटिकायां मेखला-विदूषकपत्नीपिङ्गलिका-मृगतृष्णिका आदि अधिकं किञ्चित् अप्रधानं स्त्रीचरित्रं तासां कार्यैः तथा चमत्कारित्वयुक्तचारित्रिकवैशिष्ट्येन अपितु तासां सुनामाङ्कनेन दर्शकान् निकषा चिरस्मरणीयं करोति।प्रथमे नाटिकापाठं सूच्यते समग्रपाठं समाप्तं न कर्तुं पर्यन्तं कोऽपि स्वस्तिं नास्ति। अर्थात् पाठकान् प्रेमाकुत्यानेन दुर्वारम् आकर्षणं करोति सदा।

अस्यां नाटिकायाम् अपरां मूर्तिमतीं प्रेममयीं सुललितां स्त्री तथा कुवलयमाला।तस्यामपि सुनाम्ना सह सुन्दरमुखमण्डलं युक्तं भवति,या उपमास्वरूपा।साऽपि ज्ञातवती यत् महाराजः तां प्रति प्रणयासक्तम्। परन्तु जलधिवत् गहनहृदये स्वप्रेमवशात् ऊर्मिवत् हृदयं सा निभृते प्रशमितं करोति। अर्थात् तस्या: हृदयस्य अतिदहनज्वालां प्रतिकूलावस्थायां प्रकाशितं न कृत्वा दुःखं अनुभवति। अर्थात् सर्व्वाः स्त्रीचरित्राः स्वमहतत्वेन महिमान्वितं भवति।अन्तिमे विवाहसमयेऽपि सा केवलं सुमिष्टनयनोन्मोचनेन स्वाम् आनन्दं प्रकाशयति।एतस्मात् स्त्रियः स्थिरचित्ता धैर्यशीला च प्रमाणितम्।

**अस्यां नाटिकायां मुख्यरसं यथा शृङ्गारम्। यत् नारीचरित्रेन**
अधिकमुपस्थापितम्। अपितु हास्यरसोपस्थापनेन अपि ता: सिद्धहस्ताः अभवन्।एतद्प्रसङ्गे विदूषकपत्नीपिङ्गलिका तथा महारानीमदनवत्या: दासीं मेखलायाः आचरणम् उल्लेखयोग्यम्।

नाटिकाया: विशेषं वैशिष्ट्यं यथा स्त्रीणां पारस्परिकं सौहार्दं, यत् राजान्त:पुरनिवासिनी प्रधानमहिष्याः निम्नपदस्थदासीपर्यन्तं विस्तृतम्।ता: सर्व्वा: महारानीमदनवत्याः तथा प्रधाननायिकाया: विश्वासभाञ्जिका आसन्। तद्धेतु राजानं विदूषकं च कौतूकप्रदानाय सदा गोष्ठीवद्धं भूत्वा ता: वहुघटनाया: आयोजनम् अकुर्वन्। अपितु स्वाभिष्टपुरणे कियत् परिमाणं संयम-तपस्याया: च प्रयोजनं तत् नायिकामृगाङ्कवल्याः चरित्रेन प्रमाणितम्।

नाट्यकारेण सृष्टं प्रधानाप्रधानस्त्रीचरित्रसमूहाः सर्व्वाः अपि स्वचारित्रिकवैशिष्ट्येन नाटिकां समृद्धं कुर्वन्ति।नाटिकाया: ज्ञातं यत् स्वस्वत्वं सुप्रतिष्ठितं कृतार्थं केवलं दीर्घवचनं एकचरित्रेन वहुदृश्योपस्थापनस्य च प्रयोजनं नास्ति। अस्यां नाटिकायां यत् अप्रधानचरित्रसमूहान् विचारेन वोधितम्।

अतः स्त्रीचरित्रवहुलं नाटिकायां नाट्यकारः श्रेष्ठत्वस्य पदचिन्हं सुप्रतिष्ठितं करोति। यद्यपि नाटिकाया: नामकरणं स्त्रीचरित्रेन नामाङ्कितं न।तथापि सर्व्वाः स्त्रिय: नाटिकाया: अधिकं शोभावर्धनं कुर्वन्ति, तस्मिन् कोऽपि न संशयः। पुरूषचरित्रं प्रच्छन्नं कृत्वा नारीचरित्रस्य अयं जयगीतं सत्यमपि प्रशंसनीयं यत् अस्यां नाटिकायां प्राप्तम्।कविराजशेखर: स्वजीवनेऽपि स्त्रियं सम्मानम् अददत् अयं तस्य जीवनालेख्यात् ज्ञातम्।अमुं प्रतिकृतिं तस्य रचनायामपि दृश्यते।यथा 'कर्पूरमञ्जरी' इति सट्टकम्। तदनुरूपं विश्लेषितं नाटिका विद्धशालभञ्जिका।'स्त्री' शव्दस्य अपरमेकमर्थं स्नेहमयी।वयं चिन्तनं यत् इमं स्नेहं केवलं सन्तानवात्सल्यं प्रति ज्ञातम्। परन्तु इमं चिन्तनं भ्रान्तं प्रतिपन्नं भवति यदा वयं पश्याम:

महारानीमदनवती छद्मवेशीभगिनीं सन्तानवत् प्रतिपालयति स्म। यत् सर्व्वान् पाठकपाठिकान् प्रति शिक्षनीयम्।नाटिकां सामग्रिकं विचारेन सर्वत्रं स्त्रियः आचरणं दृष्टम्।यत् नाट्यकारः अस्यां नाटिकायां साफल्यताक्षेत्रे अतिसूक्ष्मतायोगेन निवद्धं करोति।

परन्तु वैदिककालात् वयं यत् पुरुषतान्त्रिकसमाजस्य परिचयं ज्ञातं अमुष्मिन् प्रसङ्गे उपयुक्तं कथनं यत् कवि तथा नाट्यकारः राजशेखर: यतः नवचिन्तनशैलिना इमं नाटिकाम् अरोचयत् ततः इमम् आधुनिकं शाश्वतं चिरन्तनरूपेन सुहृदपाठकानां हृदये सदा तिष्ठन्तु।कालिदासीययुगे स्त्री कियत् परिमाणं प्रतारितं अभवत् वा शूद्रकस्य 'मृच्छकटिकम्' नाटके स्त्री कथं अत्याचारितम् अभवत् अनया दृश्येन सह राजशेखरस्य 'विद्धशालभञ्जिका' नाटिकायां स्त्रीणां अवस्थां तुलयितुं कृत्वा वयं एकं वैपरित्यचित्रं पश्याम:। यत्र पुरुषचरित्र: स्त्रिय: सदा उच्चस्थानं प्रदीयते।अनेन मन्यते यत् अमुम् आधुनिक चिन्तनं वर्तमानयुगस्य समाजं निकषा शिक्षणीयम्। अतः नाट्यकारः राजशेखर: येन प्रकारेण तस्य रचनायां स्त्रिय: सम्मानप्रदानं करोति तत् सुप्रशंसनीयम्।

## संदर्भ


1. वृहदारण्यक उपनिषद, 6/4/17
2. मनुसंहिता,3/56
3. साहित्यदर्पण, षष्ठपरिच्छेद,पृ.339
4. विद्धशालभञ्जिका,प्रथम अंक,2,पृ.2
5. तत्रैव, चतुर्थ अंक,पृ.153
6. तत्रैव, प्रथम अंक,14,पृ.15
7. तत्रैव, तृतीय अंक,पृ.81
8. हिन्दीभाषायाम् अनूदितम्
9. कर्पूरमञ्जरी, राजशेखर,सम्पा.श्रीरामकुमार आचार्य, चौखम्वा विद्याभवन, 2012 पुनर्मुद्रित।
10. विद्धशालभञ्जिका, राजशेखर,सम्पा.श्री बाबूलाल शूक्ल शास्त्री, चौखम्वा ओरियन्टालिया, वाराणसी, 1976 प्रथम संस्करण।
11. विद्धशालभञ्जिका, राजशेखर,सम्पा.प.रमाकान्त त्रिपाठी, चौखम्बा विद्याभवन, वाराणसी,1965 प्रथम संस्करण।
12. संस्कृत साहित्यका इतिहास,सम्पा.आचार्य वलदेव उपाध्याय, शारदा निकेतन, वाराणसी, 2001 पुनर्मुद्रण।
13. अभिज्ञानशकुन्तलम्, कालिदास,सम्पा.अनिलचन्द्र वसु, संस्कृत वुक डिपो,कोलकाता,2007 पुनर्मुद्रण।
14. ऋग्वेदसंहिता, रमेश चंद्र दत्त,हरफ प्रकाशनी,कोलकाता,700012 ।
15. वेदेर परिचय, योगीराज वसु, पश्चिमवङग राज्य पुस्तक पर्षत,कलकाता, 700013
16. साहित्यदर्पण, विश्वनाथ(समग्र) सम्पा.विमलाकान्त मुखोपाध्याय,संस्कृत पुस्तक भाण्डार, कलकाता, 2013, द्वितीय संस्करण।